जय भारति

वैजयन्ती

साप्ताहिकी संस्कृत पत्रिका । प्रतिभौमवासरं प्रकाश्यते ।

प्रथमो वर्षः । २९-९-५३ विजयवत्सरे भा. कृ. ७ ८ सञ्चिका।

संचालकः गलगली रामाचार्याः] मङ्गलवारः [संपादकः पण्ढरीनाथाचार्यः

कथं नहि स्यात् ?

कवयिता— रुद्रदेव त्रिपाठी साहित्याचार्यः मोहमयी (मुंबै)

इह भारतभूमौ संस्कृतभाषा; राष्ट्रिय-भाषा कथं नहि स्यात्? ।
भाषाणामपि सर्वासां जननी, राष्ट्रिय-भाषा कथं नहि स्यात्? ॥
जर्मन–जापानामेरिकाद्येषु, किं न वर्तते स्वा स्वा भाषा ? ।
किञ्चास्ति यदा पाकिस्ताने ह्यपि, तेषामुर्दू राष्ट्रिय-भाषा? ॥
देवानां देशे तर्हि देवगीः, राष्ट्रिय भाषा कथं नहि स्यात् ? ।
ये ये वाऽत्र गदन्त्यमरां भाषां, मृतभाषेत्यज्ञानग्रस्ताः? ॥
अमृतभाषा-प्रचारकर्मणा स्यात्, तेषां भ्रान्तिः समूलमस्ता,? ।
अमराणाममरा भाषा ह्येषा, राष्ट्रिय-भाषा कथं नहि स्यात् ? ॥
यद्यपि हिन्दीं समर्थयन्त्येते, केचन विज्ञा अत्र नितान्तम् ।
किन्तु न किं तस्या अपि सर्वस्वं, स्थितमस्यामास्ति शुभं कान्तम्, ॥
अत एवाक्षयकोषवतीयं वाग्, राष्ट्रिय-भाषा कथं नहि स्यात् ? ।
कुत्र वर्तते सत्सारल्यं तत्, क्वास्त्यपरस्यां तत् साङ्गत्वम् ? ॥
काचिद् हीना लीनाऽथ दरिद्रा, कस्या अपि सिद्धमपाङ्गत्वम्, ।
स्वयं सुसिद्धाऽबाध्या वाणीयं, राष्ट्रिय-भाषा कथं नहि स्यात्? ॥
अप्यद्य विद्यते समयो हंहो !, विज्ञा दत्त्वा झगिति ध्यानम्, ।
रक्षत रक्षत प्राणपणैरपि तत्, संस्कृतभाषायाः समानम्, ॥
वेदानां देशे वेदवागियं, राष्ट्रिय-भाषा कथं नहि स्यात् ?

[इक दिलके टुकडे हजार हुए– इति रीत्या गेयम्]

वार्षिकं मूल्यम् ५–०–० व्ही. पी. द्वारा ५–८–० प्रत्यङ्कम् ०-२-०

पूर्णसंकेतः– संपादक वैजयन्ती, योगमन्दिर बागलकोट.

Scanned by CamScanner

महाभारते

…. विदुरनीतिः ….

भारतीयसाहित्ये महाभारतग्रन्थः एकम् अपूर्वं रत्नमेव। लक्षश्लोकात्मके तस्मिन् ग्रन्थे सर्व एव विषया प्रसङ्गवशात् निरूपिता एव। तत्रापि सामाजिक–राजकीय–धार्मिक–नैतिक–आर्थिक–शैक्षणिक–तात्विक-विषयास्तु विशदतयैव प्रतिपादिताः। अत एव सर्व-ग्रन्थानामपि सूत्ररूपेणैव विमर्शनव्यसनिनः प्राचीनप–ण्डिताः "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्" इत्यादिवाक्यैः संक्षेपत एव तत्स्वरूपं विवृण्वन्ति। महाभारतं न केवलं मनोविनोदनार्थं चित्रविचित्रकथोपकथनार्थं वा प्रवृत्तम्। किन्तु कथाव्याजेन नीतिमार्गं प्रदर्श्य लोकानां हृदयानि सम्यगेव संस्करोतादिम् अपूर्वं ग्रन्थरत्नम्। न कस्मिन्नपि नीतिशास्त्रे महाभारत इव अतीव मार्मिकरीत्या नीति-निरूपणं कृतम् दृष्टं श्रुतं वाऽस्माभिः। समग्रमहाभारते तत्र तत्र सर्वत्रापि नीतिबोधकानि वाक्यानि पद्यानि कथोपकथाः संवादाः सन्दर्भाः उपदेशाश्च भूयसैव परिदृश्यन्ते। तत्रापि उद्योगपर्वणि विद्योतमाना विदुरनीतिस्तु विश्वविश्रुता एव वर्तते। तदत्र संक्षेपतः कानिचनाक्षराणि तत उध्दृत्य वाचकेभ्यः समुपाहरामः।

पाण्डवानां सकाशादागतः सञ्जयः धृतराष्ट्रं गर्हयित्वा यदा गतः तदा उद्विग्नः संभ्रान्तश्च अन्ध-राजः महाप्राज्ञं विदुरम् आकार्य "यथा च नस्तात हितं भवेच्च प्रजाश्च सर्वाः सुखिता भवेयुः" तन्मे ब्रूहि इति अपृच्छत्। विदुरः नेत्रेण पुत्रमोहेन च अन्धस्यापि तस्य पुरतः नीतिप्रपञ्चमेव विस्तारयति।

सत्यवादी विदुरः निर्दाक्षिण्येन "पाण्डवेभ्यः राज्यांशाप्रदानेन त्वं राजलक्षणहीन एव असि। यद्यपि त्वं धर्मात्मा धर्मकोविद एव। परन्तु पाण्डवप्रदेयांशे तु "विपरीततरश्च त्वं भागदेये न संमतः"। अत्र दृष्टान्ततया सरसमेकं पद्यमुदाहृतम्

> एकस्माद् वृक्षाद्यज्ञपात्राणि राजन्।
> स्रुक् द्रोणी पेडनी पीडने च॥

> एतस्माद् राजन् ब्रुवतो मे निबोध।
> एकस्माद्वै जायतेऽसच्च सच्च॥

राज्ञा च पण्डितेष्वेव राज्यभार आधातव्यः। त्वं तु

> "दुर्योधने सौबले च कर्णे दुःशासने तथा।
> एतेष्वैश्वर्यमाधाय कथं त्वं भूतिमिच्छसि॥

यत एतेषु पाण्डित्यस्य गन्धोऽपि नास्ति एकत-मस्मिन्नपि। तर्हि कोऽसौ पण्डितो नाम कानि वा तस्य लक्षणानि इति चेत्तत्राह

> निषेवते प्रशस्तानि निन्दितानि न सेवते।
> अनास्तिकः श्रद्दधान: एतत्पण्डितलक्षणम्॥

> क्रोधो हर्षश्च दर्पश्च ह्रीस्तम्भो मान्यमानिता।
> यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते॥

परं भवत्परिवारस्तु एतल्लक्षणस्य सर्वात्मना विपरीत एव।

> न सेवते प्रशस्तानि निन्दितानि निषेवते।
> नास्तिकोऽश्रद्धधानश्च………। तथा—

> क्रोधो हर्षश्च दर्पश्च ह्रीस्तम्भो मान्यमानिता।
> तमर्थादपकर्षन्ति कथं स पण्डितो भवेत्?॥

प्रसङ्गवशात् सामान्यपण्डितलक्षणान्यपि आह

> यस्य संसारिणी प्रज्ञा धर्मार्थावनुवर्तते।
> कामादर्थं वृणीते यः स वै पण्डित उच्यते॥

> क्षिप्रं विजानाति चिरं श‍ृणोति।
> विज्ञाय चार्थं भजते न कामात्॥

Scanned by CamScanner



बालोद्यानम्

भक्तिप्रियो माधवः

लेः— भीमप्पगय्या, देवरू, शिरोमणि, देवदुर्ग.

समस्तचराचरप्रपञ्चनियामकस्य, निरंजनस्य, नित्यस्य, निर्मलविग्रहस्य, रमाधवस्य, भक्तिरेव कारणं, नतु आचारः, वयः, विद्या, सौंदर्यं, धनं, वंशः, पौरुषं च ।

नाचारेण, न वयसा, न विद्यया, नापि सौन्दर्येण. नधनेन, न हि वंशेन, नचापि पौरुषेण, प्रीतो भवति भगवान् लक्ष्मीवल्लभः, किंतु यः कोपि याकापि वा भवतु परमभक्त्या तं रमेशं पूजयति ध्यायति स्मरति वा स एव परमभक्तो भवेत् नान्य इति । अत्र विषये पुराणप्रसिद्धाः सन्तजना उदाहरणतयाऽस्माकं सुस्पष्टतया परिदृश्यंते कीर्त्यंते च । तेच यथा, मांसविक्रयी व्याधः किं सदाचारी ? पंचवर्षीयो ध्रुवः किं वृद्धः ? गजेंद्रः किं विद्यावान् ? कुब्जा किं सुरूपिणी ? सुदामा किं धनी ? दासीपुत्रो विदुरः किं सद्वंशः ? उग्रसेनः किं शूरः ? नहि । परन्तु एतेषु विद्यमानां एकां शुद्धां भक्तिमेव स्वीकृत्य तान् सर्वान् उद्धारं कृतवान् श्रीहरिः, नतु आचारादिमुखान् स्वीकृतवान् । तदेवं श्लोकः —

"व्याधस्याचरणं, ध्रुवस्य च वयो, विद्या गजेंद्रस्य किं?
कुब्जायाः कमनीयरूपमधिकं किं तत्सुदाम्नो धनं ।
वंशः को विदुरस्य, यादवपतेरुग्रस्य किं पौरुषं
भक्त्या तुष्यति केवलं नतु गुणैः भक्तिप्रियो माधवः॥

एवं च भक्त्या एव संतोषमयति श्रीरमापतिः न गुणैः । अतः सर्वैः निश्चलया, विशुद्धया, परमभक्त्या, आराधनीयः स तु वासुदेवः । इति शम् ।

दुष्टस्योपकारः न कर्तव्यः

लेः— पं. के. एल्. व्हि. शास्त्री, मद्रास.

आसीत् स्वर्णपुरे पूर्वमशोको नाम बालकः ।
अभूत् स शीलसम्पन्नो जीवकारुण्यतत्परः ॥
जातु हेमन्तकाले स प्रभाते शैत्यबाधितः ।
अग्निं प्रज्वालयामास शुष्कपत्राणि सम्भरन् ॥
तत्रासीद् वृश्चिकः कश्चिच्छुष्कपत्रकदम्बके ।
वृश्चिकोऽयं वन्हिदग्धो भवेदिति भया कुलः ॥
सत्वरं स्वस्य हस्तेन तं जग्राह स बालकः ।
नैव कार्या दया दुष्टेष्विति तं बोधयन्निव ॥
तस्य हस्तं ददंशासौ सोऽपि तत्याज तं द्रुतम् ।
वृश्चिको वन्हिपतितो दौष्ट्यस्य फलमन्वभूत् ॥
अशोकोऽपि परं शोकमगमद्वेदनार्दितः ।

Scanned by CamScanner

विमर्शवेदिका

कालिदासीयनाटक
– कथामञ्जरी –

लेखकः— महोपाध्याय, शिरोमणि, साहित्यनिपुण, मद्रासप्रेसिडेन्सि कॉलेज संस्कृत प्राध्यापक, पण्डित,
के. एल्. व्यासराजशास्त्री

अत्र लघुनि पुस्तके महाकवेः कालिदासस्य मालविकाग्निमित्र, विक्रमोर्वशीय, शाकुन्तलेति नाटकत्रयस्यापि सरलगद्यरूपेण कथानुवादः विहितः वर्तते । अत्रत्या भाषाशैली अतीव सुलभा सरसा सुन्दरा च परमियत्यामपि सत्यां सरलतायां कुत्रापि संस्कृतस्य स्वरूपसौन्दर्यस्य श्रीमद्गाम्भीर्यस्य पदलालित्यस्य वाङ्माधुर्यस्य वा लेशतोऽपि च्युतिर्वा भाषाबन्धशैथिल्यं वा नैव परिदृश्यते । आदितो यावदन्तं निरर्गलं प्रवहन्ती ओजस्विनी श्रीशालिनी भाषाशैली पाठकेभ्यः पण्डितानेव परिशीर्षं रञ्जयत्यजस्रा । मूलनाटकगताः रसान्विताः भावपूर्णाः सरसश्लोका अपि तत्र तत्र संदर्भानुसारं समुद्धृता शोभाविशेषमुत्पादयन्ति कथावाचकानाम् ।

यद्यपि सम्यगधीत–समालोचित–समास्वादितमूल शाकुन्तलादिरसभावानां रसिकानाम् एतद् गद्यविवर्तनं नीरसं प्रतिभायात् । परन्तु मूलनाटकानि अनुवाच्य तद्रसमाधुर्यं तद् भावसौन्दर्यं तदर्थगाम्भीर्यं वा स्वयमनुभोक्तुम् आस्वादयितुं असमर्थानां सुकुमारमतीनां अद्यतनशालाकालेजगतविद्यार्थिनामिदमतीव उपकारकमत्युपयोगि मनोरञ्जकं च भवेदित्यत्र नास्त्येव नास्तितुल्योऽपि सन्देहः ।

अतः शालाकलाशालादिषु विश्वविद्यालयेषु च पाठ्यपुस्तकरूपेण एतन्नियोजनं सर्वात्मना योग्यमिति संसूचयामः ।

आपाण्डुराणि मसृणतमानि कर्गलानि, मनोहरं मुद्रणम्, आकर्षक आकारः, पत्राणि ७८, मूल्यं २–०–०

पुस्तकप्राप्तिस्थानं—

Pandit K. L. V. Shasrri,
31 South Tank-square Triplikane
MADRAS.

नासंपृष्टो व्युपयुङ्क्ते परार्थे ।
तत्प्रज्ञानं प्रथमं पण्डितस्य ॥

नाऽप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः ॥

न हृष्यत्यात्मसंमाने नावमानेन तप्यते ।
गाङ्गो ह्रद इवाक्षोभ्यो यः स पण्डित उच्यते ॥

प्रवृत्तवाक् चित्रकथः ऊहवान् प्रतिभानवान् ।
आशुग्रन्थस्य वक्ता च यः स पण्डित उच्यते ॥

श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा ।
असंभिन्नार्थमर्यादः पण्डिताख्यां लभेत सः ॥

अर्थं महान्तमासाद्य विद्यामैश्वर्यमेव च ।
विचरत्यसमुन्नद्धो यः स पण्डित उच्यते ॥

इतो निक्षिप्यतां चक्षुः

अद्य यावत् वैजयन्त्याः अष्टाङ्का आविष्कृताः कतिपयाङ्कानामुपरि ओवीप्तसङ्केताङ्कितकालान। पत्रालये वा मध्ये मार्गे वा भ्रष्टत्वात् बहव एव सङ्खिकाः प्रत्यागताः । कैस्ताः प्राप्ताः कैर्वा न प्राप्ता इत्येव न जानीमो वयम् । एषु चाष्टसु अङ्केषु यैः येऽङ्का नाधिगताः तैर्यदि निवेद्येत अनुपदमेव तानङ्कान् तदन्तिकं पुनः प्रेषयिष्यामः ।

यद्युपेक्ष्यते यदि वा रोचते वैजयन्ती तर्हि मूल्यं प्रेष्यताम् । नो चेत् तथैव निवेद्यताम् ।

संस्कृतस्य रक्षणं दृढीकरणं च अत्यावश्यकम्

श्री- गोविन्दवल्लभपन्त मुख्यमन्त्री उत्तरप्रदेश

संस्कृतवाङ्मयमस्माकमतीतेन सह सम्बन्धं दृढयति। प्राचीने काले भारतस्य मातृभाषा संस्कृतम् एवासीत्। न केवलं भारतस्यैव अपितु देशान्तराणामपि मातृभाषा आसीत्। अद्यापि लङ्काब्रह्मदेशाद्याः संस्कृतेनैव बलं प्राप्नुवन्ति। यदा नूतनानां शब्दानामावश्यकता जायते तदा संस्कृतभाषाया अक्षयकोषादेव तेऽपि शब्दान् सञ्चिन्वते।

वयं धर्मार्थकाममोक्षाणां ज्ञानं संस्कृतेनैव प्राप्तवन्तः। कतिचिज्जना एवं बुध्यन्ते यत् संस्कृतभाषायां केवलं धर्मार्थदर्शनयोरेव विचाराः समुपलभ्यन्ते, परन्त्विदं ज्ञानं तेषां न सम्यग्। तैः स्मर्तव्यं यत् संस्कृतभाषायां मानवजीवनस्य सर्वेषामङ्गानां आदर्शा नूत्ना नूत्ना विद्यन्ते। राजनीतेरर्थशास्त्रस्य आयुर्वेदस्य अन्यासाञ्चापि कलानां मौलिकानि तत्वानि वयं संस्कृतभाषायामेव विज्ञातुं शक्नुमः। संस्कृतवाङ्मयस्यावलोकनेनैव ज्ञायते यत् प्राचीने काले भारतीयसंस्कृतिः कियतीमुच्चतमां काष्ठामवगाहतेस्म। सर्वासां कलानां भारते प्रचार आसीत्। प्राचीने काले समुन्नतविचारशीलाः मनुष्या ज्ञानोपार्जनं कृतवन्तः। शान्तिव्यवस्था च तेषां मुख्यं ध्येयमासीत्। ते मनुष्या न केवलं स्वदेशे अपितु निखिलस्य विश्वस्य कृते शान्तिसन्देशं प्रापयन्त आसन्।

यद्यपि साम्प्रतं विदेशेषु विज्ञानस्योन्नतिरवलोक्यते परन्तु नहि तत्र शान्तिलेशोऽपि। एकं राष्ट्रमपरं राष्ट्रं न विश्वसिति। अतीते काले भारतीयसभ्यताया संस्कृतेश्चैतादृशी समुन्नतिरासीद् यज्जनाः सर्वासु कलासु निष्णाता अपि शान्तिप्रधाना आसन्। पुनरद्य वयं स्वतन्त्राः स्मः इति तस्याः, स्वसंस्कृतेः पुनर्निर्माणमस्माकं कर्तव्यं वर्तते। अस्मदीयायाः सभ्यतायाः संस्कृतेश्चायं विशेषो वर्तते यदतीतकालादारभ्याद्यावधि कुत्रचिदपि संकीर्णतायाः स्थानं नह्यासीन्न च वर्तते। सत्यपि धर्मभेदे नहि कुत्रचित् कस्यचिदुपरि अत्याचारो दृश्यते, नहि कुत्रचिद् भेदभावनया कलहलेशोऽवलोक्यते। अत्र तु नास्तिकेभ्योऽपि स्थानं दत्तमासीत्। अत्र बुद्ध्यां विवेकेन च मौलिकानां जटिलप्रश्नानां परस्परं समाधानमासीत्। वर्तते चेदमेवास्माकीनायाः सभ्यतायाः संस्कृतेश्च वैशिष्ट्यम्। अयमेव चास्माकं निधिः। इदञ्चास्माकीनायाः सभ्यतायाः संस्कृतेश्च प्रतीकमस्ति। अस्य निधेः सुरक्षा कर्तव्या। अद्य संसारस्य कृतीनामुपरि सम्यग् दृष्टिपातं विधाय स्वकीयान् सिद्धान्ताँश्च ःव सम्मुखे उपस्थाप्य शिक्षायामपि समुचितं परिवर्तनं कर्तव्यमस्माकम्। न केवलमद्य संस्कृतस्य जीवनरक्षणमेव कार्यमस्माकमपितु अस्य दृढीकरणमप्यावश्यकम्।

:: जय भारति ::

ॐ स्वस्ति साम्राज्यम्

वि. सं. भा. कृ. ७. १८७५

आन्ध्राणां चिरस्वप्नः साकारो भूत्वा सत्यसृष्टिमवतीर्ण इति यत्सत्यमेव सन्तुष्यन्ति सन्तो महान्तः। वयमपि नवोदिताय आन्ध्रसाम्राज्याय शुभोदर्कं समुत्कर्षं कामयामहे। कम्युनिष्टभूयिष्ठस्य आन्ध्रराज्यस्य भद्रतादार्ढ्यविषये संशीतिः भीतिश्च आस्ताम्। परम् आन्ध्रकेसरिणः टि. प्रकाशस्य मन्त्रिपदारोपणेन ‘प्रतिहतममङ्गलं’ ‘शान्तं पापम्’ इति मन्यामहे। कथं वा पूर्वपक्षः परित्याज्य इति अनुमिमाने ‘प्रकाशे’ प्रत्युत्पन्नमतिः राजाजी “राष्ट्रस्यार्थे त्यजेत् पक्षम्” “स्वपक्षं वा विपक्षं वा कीर्तिं च स्वजनानपि। आराधनाय राष्ट्रस्य मुञ्चतः स्यान्नते व्यथा” इत्युक्त्वा तस्य मनः प्रसाद्य यन्नवराष्ट्रस्य धुरं राजकार्य एव व्ययितजन्मनः प्रकाशस्य स्कन्धे प्रत्यष्ठापयत् तदर्थमभिनन्दामः नेतृनायकं चक्रवर्तिनं राजाजिम्। अस्यहि नेतृत्वे श्री राजगोपालाचार्यस्य धुरीणत्वे मद्रराज्यस्येव कम्युनिष्टभूतभूयिष्ठस्यापि नैकरुष्टदुष्टाधिष्ठितस्यापि आन्ध्रराज्यस्य शान्तिस्तुष्टिः पुष्टिश्चास्तु इति आशास्महे। विशालस्य मद्रराज्यस्य भद्रं विद्रावयितुमुद्युक्तानां केषांचित् द्रविडद्रोहिणां विद्वेषान्दोलन समुत्थितः “दूरेऽस्तु वैश्वानरः”

—

अस्मदीयं जीवनम् ।

[लेखकः शशिशेखरः]

विज्ञान विकासमये जगति, कीदृश्यः स्थिति-गतिरीतयो निखिलमानवानांमिति विचारणीयं, विविधविकासं लक्ष्यीकृत्य । सर्वत्र दृष्टिपथे समायाति सरससंशोधनं विज्ञानस्य । प्रातःकालात् प्रभृति आनिशम् प्रतिक्षणमस्मदीयं बन्धनं कृत्रिमकैःकलाकौशल्यैः संश्लिष्टमेव दृश्यते । लक्ष्यीकुर्वन्तु काश्चन प्रवृत्तीः प्रातरेव निबिडतिमिरे प्रकाशार्थं विद्युद्गोल्का आवश्यकतां बिभ्रति । ततश्च उष्णजलार्थं उष्णपानार्थंच विद्युद् वाहक गेस नामकयन्त्रस्य पराधीनता, पश्चात् वस्त्रप्रक्षाल्नार्थं विद्युत्साहाय्येन कार्यं कुर्वतो यन्त्रस्य । ततो गमनागमनाय बाष्पयानस्य । उष्णता व्यपाकरणाय विद्युद्व्यजनस्य च । एवं बहूनि विज्ञानविशोधकशोधित-संशोधनानि स्वकीये जीवनपथे समायान्ति इति अस्मिन्न कस्यापि विचारजुषः संदेहः समुदयेत । प्रवदन्तेच "एषु एव जीवनम्, एते एव प्राणाः अस्माद्दृते जागतिकजनानां जीवननौका कथं सरलसरससंसारसागरे समुद्वहेत्" इति आधुनिका विचार–प्रचारप्रवणम्मन्याः, समाजमनस्तत्वविश्लेषणपराः, क्रान्तिदर्शिनो मनीषिणो वर्तमानगार्हस्थ्ये । विज्ञान-चरित्रचित्रणं आबालवृद्धं, आपामरपाण्डितम्, आरङ्कराजं, प्रतिग्रामं प्रतिनगरं किं, सर्वत्रैव आनन्दप्रमोद विनोदनुन्दिस्सह पर्याप्तं सूक्ष्मेक्षिकया विलोकितम् ।

अहो कार्मणं गौरण्डगुरूणाम् । स्पष्टमेव चक्षुषो धूलीनिक्षेप । परं लोको हि गतानुगतिकः, न परमार्थं सर्वेऽपि अन्विष्यन्ति । न लक्ष्यीकुर्वन्ति दोषदुष्ठन-व्याजम्, मतिमार्गे मनागपि नाऽऽनयान्ति तेषां मलीमसं मनः । न विलोकयान्ति सौभाग्यसंपत्सुखप्रदसदाचारस्य ह्रासम् परं तानेव गवेषयन्ति कीर्तयन्ति, वर्णयान्ति, पोषयन्ति, अग्रेसरत्वञ्चार्पयन्ति ।

विज्ञानेन किं प्राप्तम् । का सुलभता समायाता । केषां जीवनानि स्वर्गीयसुखप्रदानि जातानि । "महान् लाभो लब्धो विकसितविज्ञानेन" इति एतादृक्कथनन्तु दुरे आस्तां, परं तेन जीवने वास्तविकं सौविध्यमपि नावाप्तम् ।

विज्ञानविकासेन ग्मधाः केचव मानवा यमपथ-पथिकाः तेनैव कृताः । विज्ञानविशुद्धानामौषधानां सेवनेन रोगा नैव नष्टाः परं द्विगुणाः प्रादुर्भूताः । तीव्रगतिगन्तृभि र्वाहनैरनेकेषां प्राणा अपहृताः । घन-वितानसंतानपरलोचनप्रकाण्डप्रकाशप्रच्छादकतिमिर—मपावृण्वद्भिर्विद्युद्गोल्कैरनेकेषां निर्दोषानन्दनिमग्न जीवानां जीवनभूतलोचनानां प्रचण्डप्रकाशविकास–शक्तिर्विकुण्ठितः ।

प्रतिदिनं एवंदेशीयो विज्ञानविकासविघातकोऽनुभवो वारंवारं संप्राप्यते । इत्थं परःशतान्युदाहरणानि प्राचीनानि, नवीनानि, समसामयिकानि, सर्व-कालेतिवृत्तसुलभानि तथ्यमिदं पुष्णान्ति– विज्ञानेन आत्मीयविकासो रुद्धः एव । संतोषसुखेतु नष्टप्रायो अकाण्डे समायाता संध्या मानवजीवनस्य । सृष्टिविलय कल्पना प्रादुर्भूता प्रचण्डस्वरुपेण मानवमनसि । हा हन्त, विज्ञानजन्याज्ञाननिशाचरेण किं न विहितमिति सुधिय एव अवधारयन्तु ।

To

Edited & Printed By- P. K. Galagali at Chandrika Printing Works & Published by him at *Vaijayanti Karyalaya Yogamandir*, *Bagalkot*, Dist:- Bijapur.

Scanned by CamScanner